# प्रथमः पाठः। सुष्ठु गृहीतः चौरः। प्रथमः घटकः।



देवदत्तः नाम कोऽपि धनिकः आसीत्। एकदा तस्य धनस्यूतः लुप्तः। तस्य गृहे षड् भृत्याः आसन्। तेषु एव एकः चौरः स्यात्, इति तस्य मतम्। चौरं ग्रहीतुं सः वीरबलं साहाय्यम् अयाचत। वीरबलः अवदत्, ''मित्र! अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय'' इति।



यथानिश्चितं सर्वे सेवकाः वीरबलस्य गृहम् आगताः। वीरबलेन पूर्वमेव सर्वेषां कृते समानोन्नतयः यष्टिकाः आनीताः। सः सेवकान् अवदत्, ''भोः पश्यन्तु, एताः मायायष्टिकाः। तासु एकां यष्टिकां स्वीकृत्य सर्वेः देवदत्तस्य गृहं गन्तव्यं, श्वः प्रभाते पुनरागन्तव्यम्। येन केनापि धनस्यूतः चोरितः स्यात् तस्य यष्टिका अङ्गुलिमात्रं दीर्घा भविष्यति।''



रात्रौ सर्वे भृत्याः सुखेन निद्राम् अकुर्वन् ऋते एकस्मात्। सः अचिन्तयत्, ''श्वः प्रातः मम चौर्यं प्रकटितं भवेत्। अतः अहम् अधुना एव मम यष्टिकाम् अङ्गुलिमात्रं कर्तयामि।'' इति चिन्तयित्वा तथा कृत्वा सः सुखेन सुप्तः।



अन्येद्युः लघुयष्टिकां दृष्ट्वैव वीरबलेन चौरः सम्यक् ज्ञातः गृहीतः च। अपराधी भृत्यः वीरबलस्य पादयोः पतित्वा स्वस्य अपराधम् अङ्गीकृतवान् धनस्यूतं च प्रत्यर्पितवान्।

## भाषाभ्यास:

### १. उचितं पर्यायं चिनुत।

१. कस्य धनस्यूत: लुप्त: ?
(अ) देवदत्तस्य (आ) वीरबलस्य (इ) भृत्यस्य (ई) नृपस्य

२. गृहे कति भृत्या: आसन् ?
(अ) पञ्च (आ) सप्त (इ) षड् (ई) एक:

३. वीरबल: कस्य मित्रम् ?
(अ) भृत्यस्य (आ) धनिकस्य (इ) यष्टिकाया: (ई) चौरस्य

४. 'श्व: मम चौर्यं प्रकटितं भवेत्।' इति चिन्ता कस्य चित्ते जायते?
(अ) दासस्य (आ) वीरबलस्य (इ) धनिकस्य (ई) नृपस्य

### २. क: कं वदति ?

१. ''पश्यन्तु एता: मायायष्टिका:।''

२. ''मित्र, अद्य सायङ्काले तव सर्वान् भृत्यान् मम गृहं प्रेषय।''

### ३. माध्यमभाषया उत्तरं लिखत। वीरबलेन चौर: कथं गृहीत: ?

### ४. स्तम्भमेलनं कुरुत।

| विशेषणम् | विशेष्यम् |
|---|---|
| समानोन्नतय: | धनस्यूत: |
| सर्वान् | चौर: |
| लुप्त: | यष्टिका: |
| गृहीत: | भृत्यान् |

### ५. विरुद्धार्थकशब्दानां युग्मं चिनुत लिखत च।




### ६. पाठात् समानार्थकं शब्दं चित्वा रेखाचित्रं पूरयत।

१)




२)




३)




४)



## रम्यसंस्कृतम् । किं कृत्वा ?

बालकः → पुस्तकं पठति → पाठशालां गच्छति च ।






बालकः पुस्तकं **पठित्वा** पाठशालां गच्छति ।

---

माता → पाकं करोति → भोजनं परिवेषयति च ।





माता पाकं **कृत्वा** भोजनं परिवेषयति ।

---

एतौ → पत्रं लिखतः → पत्रपेटिकायां पत्रं निक्षिपतः च।





एतौ पत्रं **लिखित्वा** पत्रपेटिकायां निक्षिपतः ।

---

नर्तक्यः → शिक्षिकाम् अनमन् → अनृत्यन् च ।





नर्तक्यः शिक्षिकां **नत्वा** अनृत्यन् ।

पठित्वा, कृत्वा, लिखित्वा, नत्वा इत्येतानि पूर्वकालवाचक-त्वान्त-अव्ययानि ।

अद्वैतः ⟶ वृक्षम् आरोहति ⟶ उपविशति च।





अद्वैतः वृक्षम् **आरुह्य** उपविशति।

---

वृद्धा ⟶ देवं प्रार्थयते ⟶ निद्रां करोति च।





वृद्धा देवं **प्रार्थ्य** निद्रां करोति।

---

पुरुषौ ⟶ हस्तौ प्रक्षालयतः ⟶ भोजनं कुरुतः च।





पुरुषौ हस्तौ **प्रक्षाल्य** भोजनं कुरुतः।

| आरुह्य, प्रार्थ्य, प्रक्षाल्य इत्येतानि पूर्वकालवाचक-ल्यबन्त-अव्ययानि। |
|---|

---

शुभदा ⟶ आपणं गच्छति ⟶ धनं ददाति ⟶ पुस्तकम् आनयति ⟶ पठति च।








शुभदा आपणं **गत्वा** धनं **दत्त्वा** पुस्तकम् **आनीय** पठति।

**वाक्यानि निरीक्ष्य भेदम् अवगच्छत –**

१. साधवः फलानि **दत्त्वा** निर्गच्छन्ति। ⟶ १. साधवः फलानि **प्रदाय** निर्गच्छन्ति।

२. वृद्धा देवं **नत्वा** कार्यम् आरभते। ⟶ २. वृद्धा देवं **प्रणम्य** कार्यम् आरभते।

३. आरक्षकाः चौरं **ताडयित्वा** कारागृहं नयन्ति। ⟶ ३. आरक्षकाः चौरं **सन्ताड्य** कारागृहं नयन्ति।

४. धनं **हृत्वा** चौरः पलायितः। ⟶ ४. धनम् **अपहृत्य** चौरः पलायितः।

## सम्भाषापत्रम्



### १. मेलनं कुरुत।

| | |
|---|---|
| खादति | सम्मिल्य |
| पिबति | स्मृत्वा |
| सम्मिलति | खादित्वा |
| स्मरति | प्राप्य |
| प्राप्नोति | पीत्वा |

### २. गणद्वये लिखत।

उक्त्वा, पूजयित्वा, सम्पाद्य, संहृत्य, धृत्वा, धावित्वा, प्रविश्य, स्नात्वा, उड्डीय, निमज्य, अवतीर्य, उत्थाय, आरुह्य, उत्पत्य, सिक्त्वा, स्थित्वा, चलित्वा, निष्पीड्य, उद्घाट्य, निष्कास्य

### ३. पूर्वकालवाचकयोः उपयोगं कृत्वा दीर्घं वाक्यं कुरुत।



मर्कटः वृक्षात् -----पेटिकां-----टोपिकां ----- मस्तके ------ वृक्षम् आरोहति।

### ४. भिन्नम् अव्ययं चिनुत।

१. रक्षित्वा, उषित्वा, उपदिश्य, उप्त्वा

२. निमन्त्र्य, वन्दित्वा, पराजित्य, सम्भूय

३. तीर्त्वा, अनुज्ञाय, सुप्त्वा, मत्वा,

४. गणयित्वा, प्रयुध्य, प्रगाय, अभिषिच्य

**क्रीडा – पूर्वकालवाचकयोः उपयोगं कृत्वा अतिदीर्घं वाक्यं वदत।**

## रम्यसंस्कृतम्। किं कर्तुम् ?




युवकः चित्रपटगृहं गच्छति चित्रपटं पश्यति च।

युवकः किमर्थं चित्रपटगृहं गच्छति? युवकः चित्रपटं **द्रष्टुं** चित्रपटगृहं गच्छति।



बालकाः गृहम् आगच्छन्  जलं च अपिबन्।
बालकाः किमर्थं गृहम् आगच्छन् ? बालकाः जलं **पातुं** गृहम् आगच्छन्।

- छात्रौ पुस्तकालयम् अगच्छताम्। **किमर्थम्**? छात्रौ **पठितुं** पुस्तकालयम् अगच्छताम्।
- मेघा फेनकं स्वीकरोति। **किमर्थम्** ? मेघा वस्त्राणि **प्रक्षालयितुं** फेनकं स्वीकरोति।

द्रष्टुं, पातुं, पठितुं, प्रक्षालयितुम् इत्येतानि हेत्वर्थक-तुमन्त-अव्ययानि।

**पठत अवगच्छत च –**

१. शुनकाः **खादितुम्** इच्छन्ति।
२. अहं **वक्तुम्** ऐच्छम्।
३. भारवाहकः भारं **वोढुं** शक्नोति।
४. ताः नार्यः रुचिरं **पक्तुं** शक्नुवन्ति।
५. जनाः भोजनं **कर्तुम्** आरभन्त।

**सम्भाषापत्रम्**





### १. हेत्वर्थकं योजयित्वा संवादं पूरयत।

सिंहः – रे मूषक, दण्डयामि त्वाम्।
मूषकः – भोः, अहं ________(गम्) इच्छामि। मुञ्चतु माम्।
सिंहः – किमर्थं मुञ्चामि ? अहं निद्रामग्नः आसम्। त्वया मम निद्राभङ्गः कृतः।
मूषकः – महाराज, एकवारं मुञ्चतु। सङ्कटकाले अहमपि तव साहाय्यं ________ (कृ) आगच्छामि।
परन्तु इदानीं मम बान्धवान् ________ (दृश्) गच्छामि। कृपया मुञ्चतु।

### २. चतुर्थं पदं लिखत।

१. त्रै-त्रातुम् :: गै – ________
२. मिल्-मेलितुम् :: लिख् – ________
३. पूज् – पूजयितुम् :: कथ् – ________
४. हन् – हन्तुम् :: मन् – ________
५. लभ्-लब्धुम् :: रभ् – ________
६. बुध् – बोद्धुम् :: युध् – ________
७. स्मृ-स्मर्तुम् :: कृ – ________
८. दृश्-द्रष्टुम् :: स्पृश् – ________

CHK632

### ३. धातोः हेत्वर्थकम् अव्ययं प्रयुज्य वाक्यं पुनर्लिखत।

१. शृगालः द्राक्षाफलम् (खाद्) उत्पतति।
२. काकः जलं (पा-पिब्) घटे उपविशति।
३. शृगालः मांसखण्डं (लभ्) काकस्य स्तुतिं करोति।
४. भीमं (हन्) दुर्योधनः कपटम् अकरोत्।
५. शशकः निद्रां (कृ) अगच्छत्।
६. सः पत्रं (लिख्) लेखनीं स्वीकरोति।